Roll No............................

Signature of Invigilator .........

Paper Code

BV-403

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination June-2022
### बी. ए. व्याकरण, चतुर्थसत्रम्
### व्याकरणम्, तृतीयपत्रम्
### संस्कृतसाहित्यम्

समयः - होरात्रयम् पूर्णाङ्काः 70

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

## (खण्ड -क)

**पृष्टेषु पञ्चसु त्रयः प्रश्नाः समाधेयाः।** (15 x3 =45)

1. अधोलिखितेषु श्लोकेषु द्वयोः व्याख्या कर्तव्या।
   (i) बालाः सुरवोचिता यूयमकृतार्थमनोरथाः।
   कथं शक्नोम्यहं वक्तुमाश्रयध्वं तपोवनम्।।
   (ii) माता पिता सुहृदिति व्यवहार मात्रमेतत्पुनर्भवनिपातविद्यातभाजाम्।
   भूतार्थदर्शनपरोक्षमलीमसानां लोको वृथा नरपते परिखेदमेति।।
   (iii) यदि तु प्रियतास्ति काचिदस्मास्वनुजानीष्व महीपते ततोऽस्मान्।
   अनवद्यमहार्यमार्यजुष्टं सुखमास्वादयितुं हि नो मनीषा।।

2. सप्तकुमारिकावदानकथायाः सारो लेखनीयः।

3. अधोलिखितेषु श्लोकेषु द्वयोः व्याख्या कार्या।
   (i) शममेष्यसि मम शोकः कथं नु वत्से त्वया रचितपूर्वम्।
   उटजद्वारविरूढं नीवारबलिं विलोकयतः।।
   (ii) यात्येकतोऽस्तशिखरं पतिरोषधीनामाविष्कृतोऽरूणपुरःसर एकतोऽर्कः।
   तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु।।
   (iii) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
   जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा।।

4. "अभिज्ञानशाकुन्तलम्" इति ग्रन्थस्य लेखक परिचयो लेखनीयः।

5. काव्यदीपिकायाः पञ्चशिखायां के विषयाः सन्ति? स्वशब्दैरूल्लेखनीयाः।

## (खण्ड -ख)

**पृष्टेषु अष्टसु पञ्च प्रश्नाः समाधेयाः।** **( 5 x5 =25)**

6. 'सप्तकुमारिकावदानम्' इति शब्दस्यार्थो लेखनीयः।

7. अधोलिखितस्य श्लोकस्यान्वयपूर्विका व्याख्या करणीया।
   बहुभिर्नरलोकपालयत्नैर्भवनानि द्रविणानि चार्जितानि।
   अपहाय नरः क्षणेन याति स्वकृतादेशितमार्ग एक एव।।

8. "अभिज्ञानशाकुन्तलम्" इति ग्रन्थस्य चतुर्भाङ्कस्य सारांशो लेखनीयः।

9. अधोलिखितस्य श्लोकस्यान्वयपूर्विका व्याख्या करणीया।
   अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
   परभृतविरुतं कलं यथा प्रतिवचनी कृतमेभिरीदृशम्।।

10. पदमात्रगता दोषाः कति सन्ति?

11. वाक्यमात्रगतान् दोषान् लिखन्तु।

12. षष्ठशिखायाः प्रतिपाद्यविषयः कोऽस्ति?

13. काव्ये कति गुणाः सन्ति?

--------------x--------------